## पापाणके कुत्सितैः । (५४/७३३)

पापाणकशब्दौ कुत्सनाभिधायिनौ, तयोः पूर्वेण समासे[1] [2]परनिपातः [3]प्राप्तः, पूर्वनिपातार्थमिदमारभ्यते । पाप अणक [4]इत्येते सुबन्ते कुत्सितवचनैः[5] सह समस्येते, तत्पुरुषश्च समासो भवति । पापनापितः । पापकुलालः । अणकनापितः । अणककुलालः ॥

## उपमानानि सामान्यवचनैः । (५५/७३४)

उपमीयतेऽनेन इत्युपमानम् । उपमानवाचीनि सुबन्तानि सामान्यवचनैः सुबन्तैः सह समस्यन्ते, तत्पुरुषश्च समासो भवति । उपमानोपमेययोः साधारणो धर्मः [6]सामान्यं, तद्विशिष्टोपमेयवचनैरयं समासः । [7]शस्त्रीव श्यामा शस्त्रीश्यामा देवदत्ता (म. भा. १.३९२) । कुमुदश्येनी । [8]हंसगद्गदा । न्यग्रोधपरिमण्डला । उपमानानि इति किम् ? देवदत्ता श्यामा । सामान्यवचनैः इति किम् ? [9]फाला इव तण्डुलाः । पर्वता इव बलाहकाः ॥

## उपमितं व्याघ्रादिभिः सामान्याप्रयोगे । (५६/७३५)

उपमेयमुपमितं, तद्वाचि सुबन्तं व्याघ्रादिभिः सामर्थ्याद् उपमानवचनैः सह समस्यते, तत्पुरुषश्च समासो भवति, न चेत् [10]सामान्यवाची शब्दः प्रयुज्यते । 'विशेषणं विशेष्येण बहुलम्' (२. १. ५७/७३६) इति परनिपाते प्राप्ते [11]विशेष्यस्य पूर्वनिपातार्थ आरम्भः । पुरुषोऽयं व्याघ्र इव पुरुषव्याघ्रः । [12]पुरुषसिंहः । सामान्याप्रयोगे इति किम् ? पुरुषोऽयं व्याघ्र इव शूरः (म. भा. १. ३९८) ।

व्याघ्र । सिंह । ऋक्ष । [13]ऋषभ । चन्दन । वृक्ष (वृक) । वराह । वृष । हस्तिन् । कुञ्जर । रुरु । पृषत (पृषत्) । पुण्डरीक । [14]बलाहक ।

आकृतिगणश्चायम्, तेनेदमपि[15] भवति – मुखपद्मम्, [16]मुखकमलम्, करकिसलयम्, [17]पार्थिवचन्द्रः इत्येवमादि ॥

## विशेषणं विशेष्येण बहुलम् । (५७/७३६)

भेदकं विशेषणं, भेद्यं विशेष्यम् । विशेषणवाचि सुबन्तं विशेष्यवाचिना समानाधिकरणेन सुबन्तेन सह बहुलं समस्यते, तत्पुरुषश्च समासो भवति । नीलोत्पलम् । रक्तोत्पलम् । [18]बहुलवचनं व्यवस्थार्थम् । क्वचित् [19]नित्यसमास एव, कृष्णसर्पः, [20]लोहितशालिः । क्वचिन्न भवत्येव, रामो जामदग्न्यः, अर्जुनः कार्तवीर्यः[21] । क्वचिद् विकल्पः, नीलमुत्पलम्, नीलोत्पलम् । [22]विशेषणम् इति किम् ? तक्षकः सर्पः । विशेष्येण इति किम् ? लोहितस्तक्षकः ॥

---

1. प्रत्यासत्तेरिति भावः इत्यधिकम् क. 2. परनिपाते प्राप्ते क. 3. प्राप्तः ततः ड. 4. इत्येतौ सुबन्तौ ड. फ. 5. सुबन्तैः इत्यधिकम् क. 6. सामान्यवचनं फ. 7. शस्त्रीव श्यामा नास्ति फ. 8. नास्ति इ. 9. काला क. 10. सामान्यं फ. 11. विशेष्यस्य नास्ति फ. 12. नास्ति फ. 13. वृषभ फ. 14. बलाधिक फ. 15. सिद्धं इत्यधिकम् क. 16. मुखमृणालम् ड. 17. पार्थिवचन्द्रमाः ड. 18. बहुलग्रहणं व्यभिचारार्थं क, °व्यभिचारार्थं इ. 19 नित्यसमासो भवति फ. 20. लोहिताहिः क, लोहितसर्पः इ, नास्ति ह. 21. व्यासः पाराशर्यः इत्यधिकम् क. इ. ड. 22. विशेषणम् – लोहितस्तक्षकः नास्ति ब.